तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यतो नृणां क्लैव्यं समुपजायते ॥
द्वेष्यस्त्रीसंप्रयोगाच्च क्लैव्यं तन्मानसं स्मृतम् ॥”
तैस्तैर्भावैर्भयशोकक्रोधादिभिः । अहृद्यैः हृद-याहितैः दुःखदत्वात् । क्षते पीडिते अस्वस्थी-भूत इति यावत् । ध्वजः शिश्नः । पतति न तून्-मति । संप्रयोगो मैथुनम् ॥ १ ॥

“कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः ।
पित्ताच्छुक्रक्षयो दृष्टः क्लैव्यं तस्मात् प्रजायते ॥”
कट्वादिनातिमात्रेण प्रवृद्धेन पित्तेन शुक्रस्य दग्धत्वात् क्लैव्यं भवति । पित्तजमेतद्द्वितीयम् ॥ २ ॥

“अतिव्यवायशीलो यो न च वाजीक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥”
शुक्रक्षयजं तृतीयम् ॥ ३ ॥

“महता मेढ्ररोगेण चतुर्थी क्लीवता भवेत् । ४ ।
वीर्य्यवाहिशिराच्छेदान्मेहनानुन्नतिर्भवेत् ॥ ५ ॥
बलिनः क्षुब्धमनसो निरोधाद्ब्रह्मचर्य्यतः ।
षष्ठं क्लैव्यं स्मृतं तत्तु शुक्रस्तम्भनिमित्तकम् ॥”
बलिनः पुष्टस्य पुरुषस्य क्षुब्धमनसः कामात् सञ्चलितस्य । मनसः ब्रह्मचर्य्यतो निरोधात् क्लैव्यं भवति ॥ ६ ॥

“जन्मप्रभृति यत् क्लैव्यं सहजं तद्धि सप्तमम् ॥” ७
असाध्यं क्लैव्यमाह ।
“असाध्यं सहजं क्लैव्यं मर्म्मच्छेदाच्च यद्भवेत् ।”
मर्म्मच्छेदात् वीर्य्यवाहिशिराच्छेदात् ॥” * ॥
अथ क्लैव्यस्य चिकित्सायां वाजीकरणविधिमाह ।

“नरो वाजीकरान् योगान् सम्यक् शुद्धौ निरामयः ।
सप्तत्यन्तं प्रकुर्व्वीत वर्षादूर्द्ध्वन्तु षोड्शात् ॥
न च वै षोडशादर्व्वाक् सप्तत्याः परतो न च ।
आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति ॥
अयद्धनुपदंशाद्या घोराश्चातीवदुर्ज्जयाः ।
अकालमरणञ्च स्याद्भजतस्त्रियमन्यथा ॥
विलासिनामर्थवतां रूपयौवनशालिनाम् ।
नराणां बहुभार्य्याणां विधिर्वाजीकरो हितः ॥
स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छताम् ।
योषित्प्रसङ्गात् क्षीणानां क्लीवानामल्परेतसाम् ॥
हिता वाजीकरा योगाः प्रीत्यपत्यबलप्रदाः ।
एतेऽपि पुष्टदेहानां सेव्याः कालाद्यपेक्षया ॥”
वाजीकराण्याह ।

“भोजनानि विचित्राणि पानानि विविधानि च ।
वाचः श्रोत्राभिरामाश्च त्वचः स्पर्शसुखावहाः ।
यामिनी सेन्दुतिलका कामिनी नवयौवना ।
गीतं श्रोत्रमनोहारि ताम्बूलं मदिरा स्रजः ॥
गन्धा मनोज्ञा रूपाणि चित्राण्युपवनानि च ।
मनसश्चाप्रतीघातो वाजीकुर्व्वन्ति मानवम् ॥
माक्षीकधातुमधुपारदलोहचूर्णं
पथ्याशिलाजतुविडङ्गघृतानि लिह्यैत् ।
एकाद्यविंशतिदिनानि गदार्द्दितोऽपि
सोऽशीतिकोऽपि रमयेत् प्रमदा युवेव ॥
गवां विरूढवत्सानां सिद्धं पयसि पायसम् ।
गोधूमचूर्णंश्च तथा सितामधुघृतान्वितम् ।
भुक्ता हृष्यति जीर्णोऽपि दशदारान् व्रजत्यपि ॥”
अथ रसाला ।

“दध्नोऽर्द्धाढ़कमीषदम्लमधुरं खण्डस्य चन्द्रद्युतेः प्रस्थं क्षौद्रपलञ्च पञ्च हविषः शुण्ठ्याश्चतुर्मांषकान् ।
एलामाषचतुष्टयं मरिचतः कर्षं लवङ्गं तथा धृत्वा शुक्लपटे शनैः करतलेनोन्मथ्य विस्रावयेत् ॥
भृङ्गारे मृगनाभिचन्दनरसश्रृटेऽगुरुद्धूपिते कर्पूरेण सुगन्धिकं तदखिलं संशोध्य संस्थापयेत् ।
स्वस्यार्थे मथुरेश्वरेण रचिता ह्येषा रसाला स्वयं भोक्तुर्मन्मथदीपनी सुखकरी कान्तेव नित्यं प्रिया ॥ * ॥

गोक्षुरेक्षुरबीजानि वाजिगन्धा शतावरी ।
मुषली वानरीबीजं यष्टी नागबला बला ॥
एषां चूर्णं दुग्धसिद्धं गव्येनाज्येन भर्जितम् ।
सितया मोदकं कृत्वा भक्ष्यं वाजीकरं परम् ॥
चूर्णादष्टगुणं क्षीरं घृतं चूर्णसमं स्मृतम् ।
सर्व्वतो द्विगुणं खण्डं खादेदग्निबलं यथा ॥
वाजीकराणि भूरीणि संगृह्य रचितो यतः ।
तस्मादमुष्य योगेषु योगोऽयं प्रवरो मतः ॥”
रतिवर्द्धनो मोदकः ॥ * ॥

“पिप्पलीलवणोपेते वस्ताण्डे घृतसाधिते ।
कच्छपस्याथ वा खादेत्ते तु वाजीकरे भृशम् ॥
पूगं दक्षिणदेशजं दशपलोन्मानं भृशं कर्त्तयेत् तच्छिन्नं जलयोगतो मृदुतरं संकृत्य चूर्णीकृतम् ।
तच्चूर्णं पटशोधितं वसुगुणे गोशुद्धदुग्धे पचेत् गव्याज्याञ्जलिसंयुतेऽतिनिविड़े दद्यात्तुलार्द्धां सिताम् ॥
पक्वं तज्ज्वलनात् क्षितिं प्रतिनयेत् तस्मिन् पुनः प्रक्षिपेत् दद्यात्तदुदाहरामि बहुला दृष्टादरात् संहिताः ।
एला नागबला बला सचपला जातीफलालिङ्गिका जातीपत्रसुपञ्चचित्रकयुतं तच्च त्वचा संयुतम् ॥
विश्वावीरणवारिवारिदवरा वांशी वरी वानरीद्राक्षा क्षेत्रुरगोक्षुराश्च महती खर्ज्जूरिका चोरिका ।
धान्याकं सकसेरुकं समधुकं शृङ्गाटकं जीरकं एर्व्वीकाश्यवानिका वरटिका मांसी मिसिर्मेथिका ॥
कन्देष्वत्र विदारिकाथ मुषली गन्धर्व्वगन्धा तथा कर्पूरं केरिकेशरं समरिचञ्चारस्य बीजं नवम् ।
बीजं शाल्मलिसम्भवं करिकणा बीजञ्च राजीवजं
भैतं चन्दनमत्र रक्तमपि च श्रीसञ्ज्ञपुष्पैः समम् ॥
सर्व्वञ्चेति पृथक् पृथक् पलमितं संचूर्ण्य तत्र क्षिपेत्
मृतं वङ्गभुजङ्गलोहगगनं सम्मारितं स्वेच्छया ।
कस्तूरी घनसारचूर्णमपि च प्राज्ञं यथा प्रक्षिपेत् पश्चादस्य तु मोदकान् विरचयेद्बिल्वप्रमाणान्नव ॥
तान् भोक्तादि सदा यथानलबलं भुञ्जीत नाम्लं रसं पूर्व्वस्मिन्नशिते गते परिणतिं प्राग्भोजनात् भक्षयेत् ।
नित्यं श्रीरतिवल्लभाख्यकमिमं यः पूगपाकं भजेत् स स्याद्दीर्घ्यविवृद्धिदृढमदनो वाजीव शक्तो रतौ ॥
दीप्ताग्निर्ब्बलवान् बली विरहितो दुष्टः स पुष्टः सदा वृद्धो योऽपि युवेव सोऽपि रुचिरः पूर्णेन्दुवत् सुन्दरः ॥”
वसुगुणे अष्टगुणे । अञ्जलिरर्द्धशरावम् । तुलार्द्धां पञ्चाशत्पलमिताम् । संहिताः सुश्रुताद्याः । नागबला गुरसकरी गुरसकडी इति च लोके । बला वरंखियार तस्या मूलत्वक् । चपला पिप्पली । जातीपत्रकं जाइपत्री । विश्वा शुण्ठी । वीरणं एतस्य मूलं उशीरं ग्राह्यम् । वारि सुगन्धवाला । वारिदः मुस्तकः । वरा त्रिफला वांशी वंशरोचना । वरी शतावरी । वानरी कपिकच्छूस्तस्या बीजं ग्राह्यम् । क्षुरः कोकिलाक्षः तस्य बीजम् । गोक्षुरस्यापि बीजम् । महती खर्ज्जूरिका छोहारा । चोरिका चोरी । एर्व्वीका काकरी मगरेला इति लोके । वराटिका वररे इति लोके । शालूकमेषां कन्दः स्याद्बीजकोषो वराटिका । मांसी जटामांसी । मिसिः सौफः । गन्धर्व्वगन्धा अश्वगन्धा तस्या मूलम् । श्रीसंज्ञं लवङ्गम् । घनसारः कर्पूरः । बिल्वप्रमाणान् पलप्रमाणान् । रतिवल्लभाख्यपूगपाकः ॥ * ॥

“एतस्मिन्नतिवल्लभे यदि पुनः सम्यक् खुराशाणिका धुस्तूरस्य तु बीजमर्क्ककरभा याषोऽश्विशोषस्तथा ।
सञ्जातपणकं तथा खसफलत्वक् वापि निःक्षिप्यते चूर्णार्द्धा विजया तदा स हि भवेत् कामेश्वरः संज्ञया ॥”
इति महाकामेश्वरः ॥ * ॥

“रक्तपित्ताधिकारोक्तः खण्डकुष्माण्डको महान् ।
रक्तपित्तादिरोगघ्नो महावाजीकरः स्मृतः ॥ * ॥
पक्वाम्रस्य रसे द्रोणे सितामाढ़कसंमिताम् ।
घृतप्रस्थमिदं दद्यान्नागरस्य पलाष्टकम् ॥
मरिचं कुड़वोन्मानं पिप्पलीद्विपलोन्मितम् ।
सलिलस्याढ़कं दत्त्वा सर्व्वमेकत्र कारयेत् ॥
पचेत्तन्मृन्मये पात्रे दारुदर्व्व्या प्रचालयेत् ।